अधीतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम् ।
कुर्व्वन् फलं न चाप्नोति दत्तं भवति निष्फलम् ॥”
कुतपो नेपालकम्बलः ॥ * ॥ तर्पणात् पूर्व्वं स्नानवस्त्रनिष्पीड़ननिषेधो यथा,—
“निष्पीड़यति यः पूर्व्वं स्नानवस्त्रन्तु तर्पणात् ।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह ॥”
याज्ञवल्क्यः ।
“स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि ।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्ध्यति ॥*॥
नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन ॥”
हारीतः । आर्द्रञ्च समवातहतमपि शुद्धमिति ॥ * ॥ मदनपारिजाते पारस्करः । एकश्चेद्वासो भवति तस्योत्तरार्द्धेन प्रच्छादयतीति । इत्याह्निकतत्त्वम् ॥ * ॥ संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा । षट्‌त्रिंशन्मतनिगमौ ।
“संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे ।
वस्त्रं न पीड़तेत्तत्र न च क्षारेण योजयेत् ॥”
इति तिथ्यादितत्त्वम् ॥

वस्त्रकुट्टिमं, क्ली, ( वस्त्रनिर्म्मितं कुट्टिममिव ।) छत्रम् । इति त्रिकाण्डशेषः ॥ (वस्त्रस्य कुट्टिमं क्षुद्रगृहम् । ) वस्त्रगृहञ्च ॥

वस्त्रगृहं, क्ली, ( वस्त्रनिर्म्मितं गृहम् । ) वस्त्रनिर्म्मितशाला । ताँबु इति भाषा । तत्पर्य्यायः । पटवापः २ पटमयम् ३ दूष्यम् ४ स्थूलम् ५ । इति त्रिकाण्डशेषः ॥

वस्त्रग्रन्थिः, पुं, ( वस्त्रस्य ग्रन्थिः । ) परिधानवस्त्रस्य ग्रन्थनम् । तत्पर्य्यायः । उच्चयः २ नीवी ३ । इति त्रिकाण्डशेषः ॥

वस्त्रपञ्जलः, पुं, कोलकन्दः । इति राजनिर्घण्टः ॥

वस्त्रपुत्त्रिका, स्त्री, ( वस्त्रनिर्म्मिता पुत्त्रिका पुत्तलिका । ) वस्त्रनिर्म्मितपुत्तलिका । इति शब्दमाला ॥

वस्त्रभूषणः, पुं, ( भूषयतीति । भूषि + ल्युः । वस्त्रस्य भूषणः रञ्जक इत्यर्थः । ) क्षारवृक्षः । इति राजनिर्घण्टः ॥

वस्त्रभूषणा, स्त्री, (वस्त्रस्य भूषणं रागो यस्याः ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्या मञ्जिष्ठाशब्दे ज्ञातव्याः ॥ )

वस्त्रयोनिः, स्त्री, ( वस्त्रस्य योनिरुत्पत्तिकारणम् । ) वसनोत्पत्तिकारणम् । यथा,—
“त्वक्‌फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥”
इत्यमरः ॥

वस्त्ररञ्जनः, पुं, ( रञ्जयतीति । रञ्ज् + णिच् + ल्युः । ) वस्त्राणां रञ्जनः । कुसुम्भः । इति राजनिर्घण्टः ॥ ( तथास्य पर्य्यायः ।
“स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जनमित्यपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

वस्नं, क्ली, (वस निवासे आच्छादने वा + “धापॄवस्यज्यतिभ्यो नः ।” उणा० ३ । ६ । इति करणादौ यथायथं नः । ) वेतनम् । मूल्यम् । ( यथा, ऋग्वेदे । ४ । २४ । ६ ।
“भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन् ॥” )
वसनम् । द्रव्यम् । इति विश्वः ॥ धनम् । भृतिः । इति हेमचन्द्रः ॥ ( वस्ते आच्छादयति शरीरमिति । कर्त्तरि नः । ) त्वक् । इत्यमरटीकायां रामाश्रयः ॥

वस्नः, पुं, ( वस् + न । ) मूल्यम् । इत्यमरः ॥

वस्नन, कटीभूषणम् । इति शब्दरत्नावली ॥

वस्नसा, स्त्री, ( वस्नं चर्म्म सीव्यति । वस्न + षिव + डः । स्त्रियां टाप् ।) स्नायुः । इत्यमरः ॥

व(स्वो)स्वौकसारा, स्त्री, ( वस्वौकेषु रत्नाकरेषु सारा । ) इन्द्रपुरी । ( यथा, रघुः ।१६।१० ।
“वस्वौकसारामभिभूय साहं
सौराज्यबद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्य्यवंश्ये
सति प्रपन्ना करुणामवस्थाम् ॥”)
इन्द्रनदी । ( यथा, महाभारते । ३ । १८८ । १०१ ।
“वस्वौकसारां नलिनीं नर्म्मदाञ्चैव भारत ! ॥”)
कुवेरपुरी । ( यथा, महाभारते । ७ ।६५।१५।
“नैतादृशं दृष्टपूर्व्वं कुवेरसदनेष्वपि ।
धनञ्च पूर्य्यमाणं नः किं पुनर्म्मनुजेष्विति ।
व्यक्तं वस्वौकसारेयमित्यूचुस्तत्र विस्मिताः ॥” )
कुवेरनदी । इति हेमचन्द्रः ॥

वह, इ क त्विषि । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) इ क, वंहयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

वह, ऐ ञ औ प्रापणे । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-द्विक०-अनिट् । ) प्रापणमिह ण्यन्तस्य रूपम् । ऐ, उह्यात् । ञ, वहति वहते भारं ग्रामं जनः प्रापयतीत्यर्थः । औ, अवाक्षीत् । अर्थान्तरे अकर्म्मकोऽयम् । यथा । जम्बूः सरिद्वहति सीमनि कम्बुकण्ठीति नैषधे । मन्दं मरुद्वहति गर्ज्जति वारिवाहः । इति महानाटके । ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः । इत्यादि सिद्धार्थमोष्ठ्यादिश्च वहधातुं मन्यते वर्गदेशशरणदेवौ । वस्तुतस्तु वक्राद्यसम्मतत्वादेवौष्ठ्यादिरनेनोपेक्षितः । ववाह इति चण्डीप्रयोगस्य तु वाह ड यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः । अनेकार्थत्वात् सुस्राव इत्यर्थः । अथवा ववृ इत्याह इत्येव व्याख्यानम् । इति दुर्गादासः ॥

वहः, पुं, ( वहति युगमनेनेति । वह + “गोचरसञ्चरेति ।” ३ । ३ । ११९ । इति घप्रत्ययेन साधु । ) वृषस्कन्धप्रदेशः । इत्यमरः ॥ ( यथा, महाभारते । ४ । २ । २१ ।
“यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ ।
दक्षिणे चैव सव्ये च गवामिव वहः कृतः ॥”
वहतीति । वह् + अच् । ) घोटकः । वायुः । इति मेदिनी । हे, ८ । पन्थाः । इति त्रिकाण्डशेषः ॥ नदः । इति हेमचन्द्रः ॥ (वाहके, त्रि । यथा, मनुः । १ । ७६ ।
“आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः ।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः ॥”)

वहतः, पुं, ( वहतीति । वह् + अतच् । ) वृषः । पान्थः । इत्युणादिकोषः ॥

वहतिः, पुं, ( वहतीति । वह् + “वहिवस्यर्त्तिभ्यश्चित् ।” उणा० ४ । ६० । इति अतिः । ) वायुः । इत्युणादिकोषः । गौः । सचिवः । इति मेदिनी । ते, १४८ ॥

वहती, स्त्री, ( वहतीति । वह् + अति । वा ङीष् । ) नदी । इति केचित् ॥

वहतुः, पुं, ( वह् + “एधिवह्योश्चतुः ।” उणा० १ । ७९ । इति चतुः । ) पथिकः । वृषभः । इति मेदिनी । ते, १४९ ॥ (विवाहकाले कन्यायै देयवस्तु । यथा, ऋग्वेदे । १० । ८५ । १३ ।
“सूर्य्याया वहतुः प्रागात् सवितायमवासृजत् ।”
“वहतुः कन्याप्रियार्थं दातव्यो-गवादिपदार्थः ।”
इति तद्भाष्ये सायणः ॥ विवाहः । यथा, ऋग्वेदे । १० । ८५ । १४ ।
“यदश्विना पृच्छमाना वयातं
त्रिचक्रेण वहतुं सूर्य्यायाः ॥”
“सूर्य्याया वहतुं विवाहमित्यर्थः ।” इति तद्भाष्ये सायणः ॥ वहनकारके, त्रि । यथा, ऋग्वेदे । ७ । १ । १७ ।
“उभा कृण्वतो वहतू मियेधे ।”
“उभौ वहतू वहनहेतू स्तोत्रं शस्त्रञ्च कृण्वतः कुर्व्वन्तौ मियेधे ।” इति तद्भाष्ये सायणः ॥ )

वहनं, क्ली, ( उह्यतेऽनेनेति । वह + करणे ल्युट् । ) डोड़ः । डुड़ी इति भाषा । यथा,—
“तरणो भेलके वारिरथो नौस्तरिकः प्लवः ।
डोड़स्तराण्डुर्व्वहनं वहित्रं वार्व्वटः पुमान् ॥”
इति त्रिकाण्डशेषः ॥
( यथा, कथासरित्सागरे । २५ । ४५ ।
“अथान्तरे च वणिजामाक्रन्दैस्तीव्रपूरितम् ।
भरादिव तद्‌तुपत्य वहनं समभज्यत ॥”
वह + भावे ल्युट् । प्रापणम् । धारणम् । यथा, महाभारते । २ । ३१ । ४१ ।
“पावनात् पावकश्चासि वहनात् हव्यवाहनः ॥”
वहतीति । वह + ल्युः । वाहके, त्रि । यथा, कथासरित्सागरे । ११९ । १६६ ।
“दैत्यानामधिपो विमानवहनः सान्तःपुरः सानुगः ॥” )

वहन्तः, पुं, ( वहति वातीति । वह + “तॄभूवहिवसीति ।” उणा० ३ । १२८ । इति झच् । ) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ( उह्यते इति । कर्म्मणि झच् । ) वाह्ये, त्रि । इत्युणादिकोषः ॥

व(ब)हलः, पुं, (उह्यतेऽनेनेति । वह + बाहुलकात् अलच् । ) पोतः । इति हारावली । १४२ ॥ दृढ़े, त्रि । इति हेमचन्द्रः ॥ (बहुत्वे च यथा, उत्तरचरिते । १ ।